# णत्वविधानम्, क्त्वा–ल्यप्, प्रेरणार्थकधातवश्च

प्रस्तुतकर्ता
डॉ. कुलदीपशर्मा
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतसंस्थानम्, जयपुर–परिसरः, जयपुरम्

# णत्वविधानम्

- ऋकारात् रकारात् षकारात् वा अव्यवहितस्य नकारस्य णकारो भवति। यथाः–
- पितृ+नाम्= पितृणाम्
- कर्+नः= कर्णः
- तृष्+ना=तृष्णा

# व्यवधानेऽपि णत्वविधानम्

- समानपदे (अखण्डपदे) ऋकारात् रकारात् षकारात् वा यदा अट्–वर्णानाम्, कवर्ग–पवर्गयोश्च एव व्यवधानं भवति, तदा व्यवहितस्य नकारस्य अपि णकारो भवति।

  अट्= स्वराः+ह्, य्, व्

  कवर्गः= क, ख, ग, घ, ङ

  पवर्गः= प, फ, ब, भ, म

  यथाः–
  - रामेण= र्+आ+म्+ए+न=ण
  - वर्गेण= व्+र्+ग+ए+न=ण
  - अर्हेण= अ+र्+ह्+ए+न=ण
- ध्यातव्यम् – पदान्तस्य नकारस्य णत्वं न भवति, यथा– रामान्

प्रायः संज्ञाभिन्नार्थे असमानपदे अर्थात् सखण्डपदे (समस्ते पदे) नस्य णकारो न भविष्यति, यथा – रामनाथः, रघुनन्दनः

(सखण्डपदे अर्थात् समस्ते पदे) संज्ञावाच्ये तु पूर्वपदे स्थितात् निमित्तात् (ऋ,ष्,र्) परस्य उत्तरपदे स्थितस्य नकारस्य णकारः नित्यं भवति, यथा –

शूर्पणखा = शूर्प+ नखा

रामायणम् = राम+ अयनम्

- पक्व, युवन्, अहन्, भगिनी, कामिनी, भामिनी इत्यादीनां शब्दानां नकारस्य णकारो न भवति, यथा– परकामिनी, मातृभगिनी, पितृभामिनी।
- पूर्वपदस्य अन्ते मूर्द्धन्य'ष'कारात् उत्तरपदे नकारस्य णकारो न भवति, यथा– निष्पानम्, दुष्पानम्।
- र्, ष् इत्यनयोः पश्चात् पानशब्दे विकल्पेन नस्य णत्वं भवति, यथा – क्षीरपाणम्/क्षीरपानम्।
- 'गिरि', 'नदी' इत्यादिशब्देषु विकल्पेन नस्य णत्वं भवति, यथा – गिरिणदी/गिरिनदी।
- भू, पू, गम् इत्येतेषां धातूनां कृत्स्थरूपेषु नस्य णत्वं न भवति, यथा – परिभवनम्, प्रगमनम्, प्रभानम्।

अशुद्धं पदं किम्?

राजकीयाणि, दर्शनाणि, मर्कटेण, मर्दनम्, वर्धनम्, औषधाणि, कार्याणि, श्रवणेन, चक्रेण, उपकरणानि, आभूषणानि, प्रसारणम्, मूर्तीणाम्, गृहस्थेण, अर्चकेण, हरिसेवणम्, पितृदेवाणाम्, प्रौढाणाम्, प्रणिपतिति, प्रनयन, गिरिणदी, स्वर्णदी, विषपाणम्, क्षीरपानम्, चतुर्नाम्, परिभवणम्, परिगमनम्, रमाणाम्, दर्शनयोग्येण, सन्तोषेण, रामचन्द्रेन, क्रियमाणे।

# क्त्वा–ल्यप्

समानकर्तृकयोः पूर्वकाले

- क्त्वा–प्रत्यये 'त्वा' इत्यवशिष्यते। 'त्वा' इत्येतदन्तपदम् अव्ययरूपेण भवति, अतः तस्य रूपाणि न प्रचलन्ति। यथा – कृत्वा, पठित्वा, भूत्वा।
- यदि धातोः पूर्वम् उपसर्गो भवति, तर्हि 'क्त्वा'–स्थाने 'ल्यप्' भवति। यथा – अनुकृत्य, प्रपठ्य, सम्भूय।
- यदि 'ल्यप्' इत्यस्य अवशिष्टः 'य' ह्रस्वस्वरात्परं समागच्छति, तर्हि 'तुक्'–आगमोऽपि भवति। यथा– सञ्चित्य, निश्चित्य।
- किन्तु, नञ्–समासे तु 'क्त्वा' एव भवति। यथा – अकृत्वा, अपठित्वा, अभूत्वा।
- 'च्वि'–प्रत्ययान्तपदैरपि 'ल्यप्' एव भवति, यथा– शुक्लीकृत्य, स्थिरीभूय।

# उदाहरणानि

| धातु | क्त्वा | ल्यप् | धातु | क्त्वा | ल्यप् |
|---|---|---|---|---|---|
| दृश् | दृष्ट्वा | संदृश्य | वस् | उषित्वा | अध्युष्य |
| नम् | नत्वा | प्रणम्य / प्रणत्य | पा | पीत्वा | निपीय |
| घ्रा | घ्रात्वा | समाघ्राय | प्रच्छ् | पृष्ट्वा | संपृच्छ्य |
| गम् | गत्वा | आगत्य / आगम्य | वद् | उदित्वा | अनूद्य |
| नी | नीत्वा | आनीय | वच् | उक्त्वा | प्रोच्य |
| ग्रह् | गृहीत्वा | संगृह्य | कृ | कृत्वा | उपकृत्य |
| ची | चित्वा | सञ्चित्य | क्रीड् | क्रीडित्वा | प्रक्रीड्य |
| लभ् | लब्ध्वा | उपलभ्य | अर्च् | अर्चित्वा | समर्च्य |
| लिख् | लिखित्वा | विलिख्य | क्री | क्रीत्वा | विक्रीय |

# उदाहरणानि

| धातु | क्त्वा | ल्यप् | धातु | क्तवा | ल्यप् |
|---|---|---|---|---|---|
| जि | जित्वा | विजित्य | ज्ञा | ज्ञात्वा | विज्ञाय |
| तॄ | तीर्त्वा | उत्तीर्य | त्यज् | त्यक्तवा | परित्यज्य |
| दह् | दग्ध्वा | संदह्य | दा | दत्वा | प्रदाय |
| धा | हित्वा | विधाय | धाव् | धावित्वा | प्रधाव्य |
| नृत् | नर्तित्वा | प्रनृत्य | बन्ध् | बद्ध्वा | प्रबध्य |
| भाष् | भाषित्वा | प्रभाष्य | मन् | मत्वा | अनुमत्य |
| भुज् | भुक्त्वा | उपभुज्य | मिल् | मिलित्वा | सम्मिल्य |
| रभ् | रब्ध्वा | आरभ्य | श्रु | श्रुत्वा | संश्रुत्य |
| सह् | सोढ्वा | संसह्य | स्मृ | स्मृत्वा | संस्मृत्य |

# उदाहरणानि

| धातु | क्त्वा | ल्यप् | धातु | क्तवा | ल्यप् |
|---|---|---|---|---|---|
| हा | हित्वा | विहाय | हस् | हसित्वा | विहस्य |
| भ्रम् | भ्रमित्वा | संभ्रम्य | वन्द् | वन्दित्वा | अभिवन्द्य |
| शप् | शप्त्वा | अभिशप्य | रच् | रचयित्वा | विरचय्य |
| रुद् | रुदित्वा | विरुद्य | शास् | शिष्ट्वा | अनुशिष्य |
| स्था | स्थित्वा | प्रस्थाय | सृज् | सृष्ट्वा | विसृज्य |
| स्तु | स्तुत्वा | प्रस्तुत्य | विद् | वेदयित्वा | निवेद्य |
| स्ना | स्नात्वा | प्रस्नाय | भक्ष् | भक्षयित्वा | संभक्ष्य |
| भी | भीत्वा | सम्भीय | भञ्ज | भङ्क्त्वा | विभज्य |
| बुध् | बुद्ध्वा | प्रबुध्य | पॄ | पूर्त्वा | आपूर्य |

# क्त्वाप्रयोग :

१. अध्यापकः लेखं ........................ (लिख्) कार्यं करोति।
२. गृहण्यः गृहकार्यं ........................ (कृ) संस्कृत–सम्भाषण–शिबिरं गच्छन्ति।
३. नितेशः आपणं........................ (गम्) भ्रात्रे उपहारम् .......... (दा) आगच्छति।
४. भगिनी ईश्वरम्........................ (अर्च्) भोजनं स्वीकरोति।
५. ते जनाः पत्राणि........................ (पठ्) आगच्छन्ति।
६. ताः महिलाः आपणिकान् वस्तु–विषये........................ (प्रच्छ्) वस्तूनि क्रीणन्ति।
७. जननी आपणात् फलानि ........................ (क्री) गृहम् आगच्छति।
८. ते बालकाः प्रातः काले मन्दिरे ........................ (स्था) प्रार्थनां कुर्वन्ति।
९. अविनाशः संस्कृत–गीतं ........................ (गै) अध्ययनं करोति।
१०. माता पुत्राय जन्मदिवसस्य शुभाशयान् ........................ (दा) उपहारं ददाति।
११. शकुन्तला पुष्पवाटिकायां पुष्पं ........................ (घ्रा) नयति।
१२. ते प्रकोष्ठेषु ........................ (शी) उत्तिष्ठन्ति। मुखं ............. (क्षाल्) आगच्छन्ति।
१३. भवत्यः गृहं ........................ (त्यज्) वासं कुर्वन्ति।
१४. भवत्यः तां ........................ (ग्रह्) आनयन्तु।
१५. हिमांशुः पितरं ........................ (नम्) विद्यालयं प्रति गच्छति।
१६. भोः श्याम! भवान् तत् कार्यं ........................ (त्यज्) शीघ्रम् आगच्छतु।
१७. भवन्तः सर्वे ........................ (चिन्त्) वदन्तु।
१८. शिक्षकः बालकान् ........................ (गण्) बालकानां संख्यां जानाति।
१९. नायकः ........................ (नृत्) प्रसन्नः भवति।
२०. बालकाः प्रकोष्ठं........................ (गम्) दीपं च ......... (ज्वाल्) पठन्ति।
२१. सः मालां ........................ (जप्) सन्तोषम् अनुभवति।
२२. भवन्तः उद्याने ........................ (भ्रम्) व्यायामं कुर्वन्ति।
२३. दुर्वासा ऋषिः शकुन्तलां ........................ (शप्) गच्छति।
२४. शिक्षकाः छात्रान् ........................ (शिक्ष्) सन्तुष्टाः भवन्ति।
२५. रमा भित्तिं ........................ (स्पृश्) प्रकोष्ठं गच्छति।
२६. भिक्षुकः भिक्षां ........................ (याच्) जीवनं यापयति।
२७. गोपालः गां ........................ (दुह्) दुग्धम् आनयति।
२८. ते क्रीडाङ्गणे ........................ (क्रीड्) आगच्छन्ति।
२९. ते ग्रामे ........................ (भू) नगरम् आगच्छन्ति।
३०. लेखकः लेखान् .................. (लिख्) जनान् प्रेरयति।

# क्त्वाप्रयोग:

१. सीता विद्यालयं गच्छति। पाठं पठति।
२. सीता पुष्पं चिनोति। उद्यानं गच्छति।
३. राधा पाकशालां गच्छति। भोजनं करोति।
४. अहं पत्रं लिखामि। प्रकोष्ठं गच्छामि।
५. गोपाल: स्नानं करोति। विद्यालयं गच्छति।
६. ता: क्रीडन्ति। दुग्धं पिबन्ति।
७. एते जलं पिबन्ति। कार्यं कुर्वन्ति।
८. सा हसति। कार्यं करोति।
९. मोहन: जयपुरे भ्रमति।
चलचित्रगृहं गच्छति।
१०. वयं पुस्तकानि नयाम:। प्रकोष्ठे पठाम:।
११. वयं पुस्तकानि क्रीणीम: गृहम् आगच्छाम:।
१२. सीता अर्चति। उद्यानं गच्छति।
१३. वधू: रोदिति। पतिगृहं गच्छति।
१४. जननी भोजनं पचति। अर्चनां करोति।
१५. काक: वृक्षे तिष्ठति। फलं खादति।
१६. शृगाल: धावति। रोटिकां खादति।
१७. शुक: फलं खादति। डयते।
१८. नर्तका: नृत्यन्ति। पुस्तकानि प्राप्नुवन्ति।
१९. राकेश: पठति। शयनं करोति।
२०. ते क्रीडन्ति। भोजनं कुर्वन्ति।
२१. भगिनी चित्रं पश्यति। क्रीडां करोति।
२२. ता: शेरते। वार्तालापं कुर्वन्ति।
२३. कौमुदी भोजनं पचति। खादति।
२४. भट्ट: युद्धं जयति। पुरस्कारं प्राप्नोति।
२५. अनुराधा दुग्धं पिबति। शयनं करोति।
२६. गीता नृत्यति। गीतं गायति।
२७. राधा आपणं गच्छति। वस्तूनि क्रीणाति।
२८. शिक्षक: पाठं पाठयति। प्रश्नं करोति।
२९. सैनिका: रणक्षेत्रं गच्छन्ति। युद्धं कुर्वन्ति।
३०. राधिका उपवनं गच्छति। पुष्पाणि चिनोति।
३१. अनुज: दुग्धं पिबति। पिष्टकं खादति।
३२. बृजेश: पाकशालां गच्छति। भोजनं करोति
३३. सीता पुस्तकं पठति। उत्तरं लिखति।
३४. ते छात्रा: सत्यं वदन्ति। प्रशंसां प्राप्नुवन्ति।
३५. ता: गीतं गायन्ति। पुरस्कृता: भवन्ति।
३६. पी. टी. उषा त्वरया धावति।
स्वर्णपदकम् आप्नोति।
३७. मित्राणि मम गृहे भोजनं कुर्वन्ति।
स्वगृहं गच्छन्ति।
३८. बालकृष्ण: क्रीडति। दुग्धं पिबति।
३९. विनोद: स्नाति। पूजां करोति।
४०. बालिका: गौरीम् अर्चन्ति। भोजनं कुर्वन्ति।
४१. कृषक: क्षेत्रं सिञ्चति।
धान्योत्पादनं करोति।
४२. गोपाल: धेनुं पालयति। दुग्धं विक्रीणीते।
४३. चञ्चल: उदयपुरे भ्रमति।
सायङ्काले ग्रामं गच्छति।
४४. कृषिवल: अन्नं नयति। विक्रयं करोति।
४५. वाहनचालक: कारयानं क्रीणाति।
वैदेशिकान् आटयति।
४६. धनिक: धनं ददाति। सन्तुष्टिम् अनुभवति।
४७. छात्रा: प्रश्नोत्तराणि रटन्ति।
उत्तीर्णा: भवन्ति।
४८. ज्योति: नूतनगीतं लिखति।
गीताभ्यासं करोति।
४९. माता भोजनं पचति। पुत्राय परिवेशयति।
५०. मन्त्री चिन्तयति। प्रतिक्रियां करोति।
५१. नर्तकी नृत्यति। दर्शकान् आनन्दयति।
५२. ते हलं कर्षन्ति। बीजानि वपन्ति।
५३. अहं समोसं स्पृशामि। उष्णत्वं जानामि।
५४. वयं नवशब्दकोषं जानीम:।
वाक्यानि रचयाम:।

# क्त्वाप्रत्ययं प्रयुज्य वाक्यं योजयन्तु

**यथा– सः शालां गच्छति। पाठं पठति।**
**सः शालां गत्वा पाठं पठति।**

१. सः भोजनं करोति। जलं पिबति।
२. शिशुः दुग्धं पिबति। हसति।
३. धनिकः भिक्षुकाय धनं ददाति। आत्मसंतृप्तः भवति।
४. पिता पुत्रं तर्जयति। अन्तः गच्छति।
५. छात्रः पुस्तकं पठति। निद्रां करोति।
६. क्रीडकः पादकन्दुकेन क्रीडति। विश्रामं करोति।
७. युवकः फलं खादति। दुग्धं पिबति।
८. भक्तः देवं नमति। पुष्पम् अर्पयति।
९. बालः विद्यालयं गच्छति। पाठं पठति।
१०. वानरः वृक्षशाखां कम्पयति। अपरं वृक्षं गच्छति।
११. गोपालः गाः वनं नयति। तृणेभ्यःवारयति।
१२. माता तण्डुलान् पचति। अपत्येभ्यः ददाति।
१३. धावकः प्रतियोगितायां धावति। प्रथमस्थानं प्राप्नोति।
१४. शिशुः भूमौ पतति। रोदिति।
१५. कर्मकरः भारं वहति। श्रान्तः भवति।
१६. छात्रः छात्रावासे वसति। महाविद्यालयं गच्छति।
१७. युवकः दिने स्वपिति। स्वप्नं पश्यति।
१८. हरिश्चन्द्रः सत्यं वक्ति। सत्यहरिश्चन्द्रः इति ख्यातिं प्राप्नोति।
१९. सा पत्रं लिखति। सख्यै प्रेषयति।
२०. भवान् वार्तां श्रृणोतु। विषयं जानातु।
२१. वयं नाटकं पश्यामः। गृहम् आगच्छामः।
२२. ताः बालिकाः विषयं स्मरन्ति। सम्यक् लिखन्ति।
२३. भिक्षुकः मार्गे अटति। भिक्षां याचते।
२४. बालिका गीतं गायति। नृत्यं करोति।
२५. कृषिकः गां दोग्धि। वत्सं मुञ्चति।
२६. ते कार्यं कुर्वन्ति। श्रान्ताः भवन्ति।
२७. शिशुः क्रीड़ाङ्कणे पतति। रोदनं करोति।
२८. अहं फलं खादितवान्। जलं पीतवान्।
२९. किञ्चित् पानीयं पिबतु। अनन्तरं गच्छतु।
३०. सा पत्रम् लिखितवती। प्रेषितवती।
३१. भवन्तः वार्तां श्रृण्वन्ति। विषयं जानन्ति।
३२. वयं नाटकं पश्यामः। गृहम् आगच्छामः।
३३. ताः बालिकाः विषयं स्मरन्ति। सम्यक् लिखन्ति।
३४. भिक्षुकाः मार्गे अटन्ति। भिक्षां याचन्ते।
३५. शिष्याः उपदेशं श्रृण्वन्ति। तथैव आचरन्ति।
३६. बालिकाः गीतं गायन्ति। नृत्यं कुर्वन्ति।
३७. वीराः युद्धं कुर्वन्ति। जयं प्राप्नुवन्ति।
३८. युवत्यः कार्य कुर्वन्ति। वेतनं प्राप्नुवन्ति।
३९. जनाः देवालयं गच्छन्ति। देवं नमस्कुर्वन्ति।
४०. जनाः परिश्रमं कुर्वन्ति। धनं सम्पादयन्ति।
४१. महिलाः वस्त्राणि क्षालयन्ति। रज्जौ प्रसारयन्ति।
४२. चालकः यानं चालयति। स्थगयति।
४३. पाचिका चालन्या चूर्णं शोधयति। रोटिकां पचति।
४४. गायकः गीतं गायति। यशः लभते।
४५. श्रीरामचन्द्रः सुखं त्यक्तवान्। वनं गतवान्।
४६. सैनिकाः कष्टं सहन्ते। देशं रक्षन्ति।

# ल्यबन्तप्रयोगा:

१. मुख्यातिथि: दीपं प्रज्वालयति । कार्यक्रमस्योद्घाटनं करोति ।

२. शिक्षक: छात्रान् ज्ञानेन सन्तोषयति । प्रश्नान् करोति ।

३. भगिनी स्नातककक्षाम् उत्तीर्णवती । शिक्षाशास्त्रिपरीक्षां लिखितवती ।

४. छात्रा: संस्कृताध्ययनं परित्यजन्ति । पश्चातापं कुर्वन्ति ।

५. महापुरुष: जनान् उपदिशति । प्रभावितान् करोति ।

६. अनिलकुम्बले कन्दुकं, प्रहरति । प्रतिस्पर्धिदलं प्रति प्रेषयति ।

७. दुर्गा सखीं सम्मिलति । अजयमेरुं गच्छति ।

८. बालिका बालकम् अवलोकते । परिचयं करोति ।

९. शिष्या: गुरुं प्रणमन्ति । साक्षात्काराय गच्छन्ति ।

१०. पादप: प्रतिकूलवातावरणेन विनश्यति । अस्तित्वं समापयति ।

११. उत्तमा बालिका गृहकार्यं समाप्नोति । क्रीडति ।

१२. नवविवाहित: मिष्टान्नम् आनयति । वितरति । मोदम् आप्नोति ।

१३. दानवीर: बुभुक्षितेभ्य: भोजनं प्रददाति । पुण्यम् आप्नोति ।

१४. गोपालक: दुग्धम् आपूरयति । विक्रयं करोति ।

१५. व्यवसायी वस्तूनि विक्रीणीते । धनार्जनं करोति ।

१६. सुखदास: गृहं प्रविशति । पाठनं करोति ।

१७. स: कार्यात् विरमति । भोजनं करोति ।

१८. कृष्ण: रहस्यं विजानाति । मां वदति ।

१९. शुक: आकाशे उड्डयते । हर्षम् अनुभवति ।

२०. स: शङ्काम् उत्पादयति । निवारणं करोति ।

२१. राधा पुष्पम् आनयति । अर्चनां करोति ।

२२. महेश: युद्धं विजयते । हर्षम् अनुभवति ।

# ल्यप्प्रयोगं कृत्वा वाक्यानि योजयन्तु

१. सत्कर्म आचरति। कीर्तिं प्राप्नोति।
२. सर्वाणि वस्तूनि सङ्गृह्णामि।
सुरक्षितं स्थापयामि।
३. यानात् अवतरतु। पादाभ्याम् आगच्छतु।
४. शीघ्रम् उत्तिष्ठामः। सम्यक् पठामः।
५. देवः भक्तम् अनुगृहीतवान्। स्वर्गं गतवान्।
६. प्रवृत्तं विस्मरतु। यथापूर्वं तिष्ठतु।
७. वयं संस्कृतेन व्यवहरामः।
आनन्दम् अनुभवामः।
८. सः दुःखम् अनुभवति। कष्टेन जीवति।
९. रामः राज्यं परित्यक्तवान्। अरण्यं गतवान्
१०. गतं विषयं सम्यक् विमृशतु। निर्णयं करोतु।
११. भवन्तः एव निर्णयन्तु। मां सूचयन्तु।
१२. सः सदापि विचिन्तयति। भाषणं करोति।
१३. रज्जुम् आकर्षतु। बन्धनं करोतु।
१४. अनुजम् उत्थापयतु। अत्र आनयतु।
१५. अहं भवन्तं प्रापयामि। अग्रे गच्छामि।
१६. सर्वे निश्चिन्वन्तु। कार्यारम्भं कुर्वन्तु।
१७. भगवति विश्वसिमि। कार्यं करोमि।
१८. सः मृच्छकटिकम् अनुवदति। प्रकाशयति।
१९. माता शिशुम् आलिङ्गति। क्षीरं पाययति।
२०. सः भारम् उन्नयति। उपरि स्थापयति।
२१. भवन्तः अत्र उपस्थितवन्तः।
अस्मान् तोषितवन्तः।
२२. रेलयानात् अवतरतु। याने उपविशतु।
२३. बालकाः उत्थास्यन्ति। गुरुं नंस्यन्ति।
२४. भवत्यः वस्त्राणि प्रक्षालयन्तु।
निष्पीडन्तु प्रसारयन्तु च।
२५. सैनिकः शस्त्रेण प्रहरति। शत्रुं मारयति।
२६. खगाः आकाशे उड्डयन्ते। विहरन्ति।
२७. यानं किञ्चित् विरमति। अन्यनगरं गच्छति।
२८. गोपालः प्रकोष्ठं <u>प्रविशति</u>।
अध्ययनं करोति।
२९. रामः युद्धं <u>विजयते</u>। पुरस्कारं प्राप्नोति।
३०. ताः अजाम् <u>आनयन्ति</u>। दुग्धं दुहन्ति।
३१. गणेशः फलम् <u>आददाति</u>। खादति।
३२. रमा बालकम् <u>उपदिशति</u>। पुस्तकं ददाति।
३३. शृगालः ग्रामम् <u>आगच्छति</u>। धावति।
३४. ते पुरस्कारं <u>स्वीकुर्वन्ति</u>। ग्रामं गच्छन्ति।
३५. ताः हर्षम् <u>अनुभवन्ति</u>। कार्यं कुर्वन्ति।
३६. महोदयः फलानि <u>वितरति</u>। खादति।
३७. सः मित्रं पापात् <u>निवारयति</u>।
सुखम् अनुभवति।
३८. सः ग्रामम् <u>उपवसति</u>। कार्यं करोति।
३९. राधा आभूषणं <u>प्राप्नोति</u>। विवाहं गच्छति।
४०. काकः आकाशे <u>उड्डयते</u>। सुखम् अनुभवति।
४१. गीता वार्तां <u>निवेदयति</u>। रूप्यकाणि प्राप्नोति।
४२. शिष्याः <u>उत्तिष्ठन्ति</u>। मुखप्रक्षालनं कुर्वन्ति।
४३. बालकाः पाठं <u>विस्मरन्ति</u>। स्मरणं कुर्वन्ति।
४४. सीता द्वारम् <u>उद्घाटयति</u>। मार्जनीं करोति।
४५. सः सम्यक् <u>आचरति</u>। योग्यतां सम्पादयति।
४६. सा वस्तूनि <u>विक्रीणीते</u>। लाभं प्राप्नोति।
४७. एते कार्यम् <u>अवगच्छन्ति</u>। कार्यं कुर्वन्ति।
४८. बालकृष्णः कार्यात् <u>विरमति</u>।
भोजनं करोति।
४९. सः आसन्दे <u>उपविशति</u>। लेखनं करोति।
५०. नदी <u>प्रवहति</u>। सागरं गच्छति।
५१. सः धेनुं <u>परित्यजति</u>। पुनः स्वीकरोति।

## अधोरेखाङ्कितानां शब्दानां परिष्कारं करोतु–

१. सः परह्यः गृहं आगत्वा एतां सूचनां दत्तवान्।

२. भवान् शतं रूप्यकाणि स्वीकृत्वा किं करिष्यति?

३. तत्र कार्यालयप्रवेशसमये भवतः परिचयपत्रं प्रदर्शयित्वा गन्तव्यं भवति।

४. अहं पत्रं प्रदत्वा तत्क्षणमेव प्रस्थितवान्।

५. माता आपणतः वस्तूनि आनीत्वा बन्धुगृहं गतवती।

६. कार्यक्रमम् अङ्गीकृत्वा अनन्तरं न शक्यते इति न वक्तव्यम्।

७. भवान् एतत् कर्तुं शक्नोति वा ? इति विचिन्तयित्वा श्वः वदतु।

८. भवती रेल्वेस्थानकं गच्छति किल, देहलीं प्रति शयनिकाः लभ्यन्ते वा? इति विचारयित्वा ऽऽगच्छतु।

९. सर्वाणि वस्त्राणि प्रक्षालयित्वा स्थापितवती वा ?

१०. किं किं करणीयम् इति सः सर्वं विलिखित्वा प्रेषितवान्।

११. नागराजः स्कूटरचालनं परित्यक्त्वा लोकयानेन एव गच्छति।

१२. एते श्रीमन्तः जनार्दनमहोदयाः अद्यतनसभायाः अध्यक्षपीठम् अलङ्कृत्वा अस्मान् अनुगृहीतवन्तः, अतः तेभ्यः धन्यवादान् समर्पयामः।

१३. स्मृत्वा आगच्छतु इत्युक्ते प्रधानमेव विस्मृत्वा आगतवान् किल।

१४. अहं किञ्चित् लिखितवती कृपया संशोधयित्वा ददाति वा ?

१५. कुमारमिश्रः मार्गे देवालयः लब्धश्चेत् नमस्कृत्वा एव अग्रे गच्छति।

# प्रेरणार्थकधातवः

| | |
|---|---|
| वर्धते | वर्धयति |
| वन्दते | वन्दयति |
| प्रकाशते | प्रकाशयति |
| उड्डयते | उड्डाययति |
| हसति | हासयति |
| कर्षति | कर्षयति |
| आनयति | आनाययति |
| पिबति | पाययति |
| करोति | कारयति |
| खादति | खादयति |

| | |
|---|---|
| गायति | गापयति |
| लिखति | लेखयति |
| ददाति | दापयति |
| पचति | पाचयति |
| शृणोति | श्रावयति |
| पठति | पाठयति |
| पतति | पातयति |
| कुप्यति | कोपयति |
| चोरयति | चोरयति |